## BAL BHARATI PUBLIC SCHOOL, PITAMPURA, DELHI – 110034

## CLASS IX - SANSKRIT

Elessons_9_SANSKRIT-8 June 1

शब्दरूपाणि

प्रश्न - प्रदत्तवाक्यानि समुचितशब्दरूपेण पूरयत

शब्दरूप - बालक, लता, फल, साधु, नदी, मातृ, पितृ, अस्मद्, युष्मद्, किम्।

निर्देश - छात्र इन शब्दरूपों को याद करें। परीक्षा में शब्दरूपों के प्रयोग द्वारा रिक्त-स्थान-पूर्ति का प्रश्न पूछा जाता है।

| | | | |
|---|---|---|---|
| 1) अस्मिन् कक्षे चत्वारः ____ सन्ति। | बालकाः | बालकौ | बालकेभ्यः |
| 2) ____ विना जीवनं निष्फलं भवति। | विद्यासु | विद्या | विद्याम् |
| 3) ____ आज्ञा सदैव पालनीया। | गुरुभ्यः | गुरूणाम् | गुरवः |
| 4) गृहे ____ सन्ति। | फलानि | फले | फलम् |
| 5) भारते अनेकाः ____ वहन्ति। | नदी | नद्यः | नद्यौ |
| 6) मम ____ धार्मिकमहिला अस्ति। | मात्रा | मात्रे | माता |
| 7) मम ____ नाम पुष्पा अस्ति। | मातुः | माता | मातरम् |
| 8) ____ गृहे क्रीडामः। | अहम् | आवाम् | वयम् |
| 9) ____ छात्रः अस्मि। | युवाम् | यूयम् | अहम् |
| 10) ____ मित्रे पठावः। | आवाम् | त्वं | वयम् |
| 11) ____ कुत्र गच्छसि? | तव | त्वम् | तुभ्यम् |
| 12) ____ कुत्र वसथः? | त्वम् | युवाम् | यूयम् |
| 13) गङ्गा यमुना च भारतस्य पवित्रे ____ स्तः। | नद्यौ | नदी | नद्यः |
| 14) वने ____ किमर्थं तपन्ति। | साधुः | साधू | साधवः |
| 15) वृक्षाणां सुरक्षा ____ कर्तव्यम् अस्ति। | अस्माभिः | अस्माकम् | वयम् |
| 16) ____ पुष्पाणि शोभन्ते। | लतायाम् | लता | लताः |
| 17) ____ अधुना कुत्र गच्छथ? | त्वम् | यूयम् | युष्माकम् |
| 18) ____ पत्नी सीता अस्ति। | रामेण | रामस्य | रामाय |
| 19) ____ जलं नीलवर्णम् अस्ति। | यमुनायाः | यमुना | यमुनायै |
| 20) ____ कृपया वयं जीवितं शक्नुमः। | सूर्यः | सूर्येण | सूर्यस्य |
| 21) अध्यापिका ____ पश्यति। | बालकाः | बालकान् | बालकौ |
| 22) ____ पिता किं करोति? | तव | त्वम् | त्वया |
| 23) पिता ____ वस्त्राणि आनयति। | मया | मह्यम् | माम् |
| 24) अस्यां ____ पुष्पाणि विकसन्ति। | लताः | लतया | लतायाम् |
| 25) वयं ____ नमामः। | साधून् | साधुभ्यः | साधूनाम् |

## धातुरूपाणि

प्रश्न - प्रदत्तवाक्यानि समुचितधातुरूपेण पूरयत

पाठ्यक्रम में सम्मिलित धातु - पठ्, अस्, कृ, पा, गम्, वद्, भू, क्रीड्, नी, दृश् (पाँचों लकार) । लभ्, सेव् (लट्, लृट्)

| | | | | |
|---|---|---|---|---|
| 1 | अहं परीक्षाविषये निश्चिन्तः ——— । | अस्मि | अस्ति | आसीत् |
| 2 | समृद्धिः श्वः चेन्नईनगरं ——— । | गमिष्यति | गच्छति | अगच्छत् |
| 3 | रिया ह्यः एव विदेशात् ——— । | गमिष्यति | गच्छति | आगच्छत् |
| 4 | अहं गृहकार्ये मातुः सहायतां ——— । | कुर्याः | कुर्याम् | कुर्यात् |
| 5 | सर्वे रामायण-धारावाहिकं ——— । | पश्येयुः | पश्येत् | पश्येताम् |
| 6 | शिशुः प्रातः दुग्धमेव ——— । | पिबसि | पिबति | पिबेयुः |
| 7 | छात्रा! कदापि असत्यं मा ——— । | वदन्ति | वदताम् | वदत |
| 8 | सचिनः क्रिकेटक्रीडां ——— । | क्रीडति | क्रीडतः | क्रीडन्ति |
| 9 | तौ कृषकौ क्षेत्रं प्रति ——— । | गच्छथः | गच्छतः | गच्छन्तु |
| 10 | ह्यः त्वं कुत्र ——— ? | भविष्यसि | असि | आसीः |
| 11 | गीतं श्रुत्वा वयम् प्रसन्नाः ——— । | भविष्यामः | भवन्ति | अभवन् |
| 12 | श्वः दीपाशः पाठं ——— । | पठिष्यामि | पठिष्यति | अपठत् |
| 13 | वासुः मातरं पितरं च ——— । | सेवते | सेवे | सेवते |
| 14 | कृषः हृदयः च पुरस्कारं ——— । | लप्स्येते | लप्स्यते | लप्स्यन्ते |
| 15 | हर्षितः कदापि उच्चैः न ——— । | वदसि | वदति | वदामि |
| 16 | वेदिका नव्या प्रणया च गृहं ——— । | गच्छतः | गच्छामः | गच्छन्ति |
| 17 | अहं चलचित्रं न ——— । | अपश्यम् | अपश्यत् | अपश्याम |
| 18 | कुश! त्वमपि क्रीडां ——— । | क्रीडेत | क्रीडेः | क्रीडेत् |
| 19 | वाणी सत्यं ——— । | अवदम् | अवदः | अवदत् |
| 20 | कैरवः नूनं सफलतां ——— । | लप्स्यते | लप्स्यसे | लप्स्येथे |
| 21 | परी गृहकार्यं न ——— । | अकुरुतम् | अकरवम् | अकरोत् |
| 22 | युवां शोभनं कार्यक्रमं ——— । | पश्यतम् | पश्यताम् | पश्यन्तु |
| 23 | कृषकः वृषभौ क्षेत्रम् ——— । | अनयः | अनयत् | अनयम् |
| 24 | पिता आपणात् फलानि ——— । | आनयः | आनयन् | आनयति |
| 25 | सर्वे स्वस्थाः ——— । | सन्तु | स्ताम् | अस्तु |

—x—

# 4 कल्पतरुः

1) अस्ति हिमवान् नाम सर्वरत्नभूमिर्नगेन्द्रः। तस्य सानोरुपरि विभाति कञ्चनपुरं नाम नगरम्। तत्र जीमूतकेतुरिति श्रीमान् विद्याधरपतिः वसति स्म। तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः। स राजा जीमूतकेतुः तं कल्पतरुम् आराध्य तत्प्रसादात् च बोधिसत्वांशसम्भवं जीमूतवाहनं नाम पुत्रं प्राप्नोत्। स महान् दानवीरः सर्वभूतानुकम्पी च अभवत्। तस्य गुणैः प्रसन्नः स्वसचिवैश्च प्रेरितः राजा कालेन सम्प्राप्तयौवनं तं यौवराज्येऽभिषिक्तवान्। यौवराज्ये स्थितः स जीमूतवाहनः कदाचित् हितैषिभिः पितृमन्त्रिभिः उक्तः– "युवराज! योऽयं सर्वकामदः कल्पतरुः तवोद्याने तिष्ठति स तव सदा पूज्यः। अस्मिन् अनुकूले स्थिते शक्रोऽपि नास्मान् बाधितुं शक्नुयात्" इति।

- सन्धिच्छेद -

1) सर्वभूमिः + नगेन्द्र
2) सानोः + उपरि
3) जीमूतकेतुः + इति
4) गृह + उद्याने
5) सः + राजा
6) बोधिसत्त्व + अंशसम्भवं
7) सर्वभूत + अनुकम्पी
8) स्वसचिवैः + च
9) यौवराज्ये + अभिषिक्तवान्
10) यः + अयं
11) तव + उद्याने
12) सः + तव
13) शक्रः + अपि
14) न + अस्मान्

- सरलार्थ -

सब रत्नों की भूमि, पर्वतों में श्रेष्ठ हिमालय नामक पर्वत है (था)। उसकी चोटी पर कंचनपुर नामक नगर सुशोभित होता था। वहाँ विद्याधरों का राजा, श्रीमान जीमूतकेतु रहता था। उसके घर के बगीचे में वंश परंपरा से आया हुआ कल्पवृक्ष स्थित था। उस राजा जीमूतकेतु ने उस कल्पवृक्ष की पूजा करके और उसकी कृपा से बोधिसत्त्व के अंश से उत्पन्न जीमूतवाहन नामक पुत्र प्राप्त किया। वह महान, दानवीर और सब प्राणियों पर दया करने वाला हुआ। उसके गुणों से प्रसन्न होकर और अपने मंत्रियों से प्रेरित राजा ने समय पर जवानी को प्राप्त उसे (राजकुमार को) युवराज के पद पर अभिषेक किया। युवराज के पद पर स्थित उस जीमूतवाहन से कभी पिता के हितकारी मंत्रियों ने कहा - "हे युवराज! जो यह सब कामनाओं को पूरा करने वाला कल्पवृक्ष आपके बगीचे में स्थित है, वह तुम्हारा

सदैव पूज्य है। इसके अनुकूल होने पर इंद्र भी इन्हें दुःखी नहीं कर सकता है।

अभ्यास

एकपदेन उत्तरत

i) श्रीमतः विद्याधरपतेः किं नाम आसीत्?

ii) राजः गृहोद्याने कः स्थितः?

पूर्णवाक्येन उत्तरत

i) जीमूतवाहनः कीदृशः आसीत्?

ii) हितैषिभिः मन्त्रिभिः किम् उक्तम्?

निर्देशानुसारम् उत्तरत

| | | | |
|---|---|---|---|
| i) प्राप्नोत् क्रियापदस्य कर्तृपदं चिनुत। | जीमूतकेतुः | विद्याधरपतिः | कल्पतरुम् |
| ii) तस्य गुणैः ... अत्र ... तस्य सर्वनाम कस्मै प्रयुक्तम्? | कल्पतरवे | जीमूतवाहनाय | नृपाय |
| iii) कल्पतरुः पदस्य विशेषणपदं किम्? | कुलक्रमागतः | सर्वकामदः | उभौ |
| iv) कृपणः पदस्य विपरीतपदं चिनुत। | सर्वभूतानुकम्पी | महान् | दानवीरः |

2) आकर्ण्यैतत् जीमूतवाहनः अन्तरचिन्तयत्–"अहो बत! ईदृशममरपादपं प्राप्यापि पूर्वैः पुरुषैरस्माकं तादृशं फलं किमपि नासादितं किन्तु केवलं कैश्चिदेव कृपणैः कश्चिदपि अर्थोऽर्थितः। तदहमस्मात् मनोरथमभीष्टं साधयामि" इति। एवमालोच्य स पितुरन्तिकमागच्छत्। आगत्य च सुखमासीनं पितरमेकान्ते न्यवेदयत्– "तात! त्वं तु जानासि एव यदस्मिन् संसारसागरे आशरीरमिदं सर्वं धनं वीचिवच्चञ्चलम्। एकः परोपकार एवास्मिन् संसारेऽनश्वरः यो युगान्तपर्यन्तं यशः प्रसूते। तदस्माभिरीदृशः कल्पतरुः किमर्थं रक्ष्यते? यैश्च पूर्वैरयं 'मम मम' इति आग्रहेण रक्षितः, ते इदानीं कुत्र गताः? तेषां कस्यायम्? अस्य वा के ते? तस्मात् परोपकारैकफलसिद्धये त्वदाज्ञया इमं कल्पपादपम् आराधयामि।

• सन्धिच्छेद -

1) आकर्ण्य + एतत्
2) अन्तः + अचिन्तयत्
3) ईदृशम् + अमरपादपं
4) प्राप्य + अपि
5) पुरुषैः + अस्माकं
6) न + आसादितं
7) कः + चित् + अपि
8) अर्थः + अर्थितः
9) तत् + अहम् + अस्मात्
10) मनोरथम् + अभीष्टम्
11) एवम् + आलोच्य
12) पितुः + अन्तिकम् + आगच्छत्
13) सुखम् + आसीनं
14) पितरम् + एकान्ते
15) यत् + अस्मिन्
16) वीचिवत् + चञ्चलम्
17) एव + अस्मिन्
18) संसारे + अनश्वरः
19) यः + युगान्तपर्यन्तं
20) तत् + अस्माभिः + ईदृशः
21) यैः + च
22) पूर्वैः + अयं
23) कस्य + अयम्
24) त्वत् + आज्ञया

• सरलार्थ -

अर्थ- यह सुनकर जीमूतवाहन ने मन में सोचा—"अरे आश्चर्य है। ऐसे अमर पौधे को प्राप्त करके भी हमारे पूर्वजों के द्वारा वैसा कोई भी फल नहीं प्राप्त किया गया, किंतु केवल कुछ ही कंजूसों ने कुछ धन प्राप्त किया। इससे तो मैं अपनी प्रिय इच्छा को पूरा करूँगा।" ऐसा सोचकर वह पिता के पास आया। (वहाँ) आकर सुखपूर्वक बैठे हुए पिता को एकांत में निवेदन किया—"पिताजी! आप तो जानते ही हैं कि इस संसार रूपी सागर में इस शरीर से लेकर सारा धन लहरों की तरह चंचल है। एक परोपकार ही इस संसार में अनश्वर (नष्ट नहीं होने वाला) है, जो युगों तक यश पैदा करता (देता) है। तो हम ऐसे कल्पवृक्ष की किसलिए रक्षा करते हैं? और जिन पूर्वजों के द्वारा यह 'मेरा-मेरा' इस आशा से रक्षा किया गया, वे (पूर्वज) इस समय कहाँ गए? उनमें से किसका यह है? अथवा इसके ये कौन हैं? तो परोपकार के एकमात्र फल की सिद्धि (प्राप्ति) के लिए आपकी आज्ञा से मैं इस कल्पवृक्ष की आराधना करता हूँ।

प्रश्नाः -

एकपदेन उत्तरत

i) कः अन्तरचिन्तयत् ?

ii) जीमूतवाहनः कल्पतरोः किं याचितुम् इच्छति स्म ?

पूर्णवाक्येन उत्तरत

i) जीमूतवाहनः पितरमेकान्ते किं न्यवेदयत् ?

ii) किम् आलोच्य जीमूतवाहनः पितुरन्तिकमागच्छत् ?

भाषिक- कार्यम् -

| | | | |
|---|---|---|---|
| i) 'बहिः' पदस्य विपर्ययपदं चिनुत। | अन्तः | आकर्ण्य | इदानीम् |
| ii) 'चिन्तयित्वा' पदस्य पर्यायपदं चिनुत। | न्यवेदयत् | आलोच्य | अचिन्तयत् |
| iii) 'अन्तरचिन्तयत्' पदस्य कर्तृपदं किमस्ति ? | एतत् | आकर्णयैतत् | जीमूतवाहनः |
| iv) 'अहम्' सर्वनाम कस्मै प्रयुक्तम् ? | कल्पतरवे | जीमूतवाहनाय | नृपाय |

3) अथ पित्रा 'तथा' इति अभ्यनुज्ञातः स जीमूतवाहनः कल्पतरुम् उपगम्य उवाच—"देव! त्वया अस्मत्पूर्वेषाम् अभीष्टाः कामाः पूरिताः, तन्ममैकं कामं पूरय। यथा पृथ्वीमदरिद्रां पश्यामि, तथा करोतु देव" इति। एवंवादिनि जीमूतवाहने "त्यक्तस्त्वया एषोऽहं यातोऽस्मि" इति वाक् तस्मात् तरोरुदभूत्।

क्षणेन च स कल्पतरुः दिवं समुत्पत्य भुवि तथा वसूनि अवर्षत् यथा न कोऽपि दुर्गत आसीत्। ततस्तस्य जीमूतवाहनस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम्।

• सन्धिच्छेद

1) तत् + मम + एकं
2) पृथ्वीम् + अदरिद्रां
3) त्यक्तः + त्वया
4) एषः + अहं
5) यातः + अस्मि
6) तरोः + उदभूत्
7) सः + कल्पतरुः
8) कः + अपि
9) दुर्गतः + आसीत्
10) ततः + तस्य

अर्थ- इसके बाद पिता के द्वारा 'वैसा ही करो' ऐसी आज्ञा को प्राप्त किया हुआ वह जीमूतवाहन कल्पवृक्ष के पास जाकर बोला–"हे देव (भगवन्)! आपने हमारे पूर्वजों की सारी प्रिय कामनाएँ पूर्ण की हैं, तो मेरी एक कामना को पूरा कीजिए। जैसे पृथ्वी पर गरीबों को न देखूँ, वैसे आप भगवन् कीजिए।" इस प्रकार जीमूतवाहन के कहने पर "तुम्हारे द्वारा छोड़ दिया गया यह मैं जा रहा हूँ" इस प्रकार की आवाज़ उस पेड़ से हुई।

और क्षणभर में वह कल्पवृक्ष आकाश में उठकर भूमि पर वैसे रत्नों को बरसाने लगा, जिससे कोई भी दुर्गत (गरीब) नहीं रह गया। उसके बाद सभी जीवों पर कृपा करने से उस जीमूतवाहन का यश सब जगह फैल गया।

अभ्यास:

एकपदेन उत्तरत

1) जीमूतवाहनः कम् उपगम्य उवाच ?
2) जीमूतवाहनः काम् अदरिद्रां द्रष्टुमिच्छति स्म ?

पूर्णवाक्येन उत्तरत

1) जीमूतवाहनः कल्पतरुम् उपगम्य किम् उवाच ?
2) कल्पतरुः दिवं समुत्पत्य किमकरोत् ?

यथानिर्देशम् उत्तरत

| | | | |
|---|---|---|---|
| 1) 'उवाच' क्रियापदस्य कर्तृपदं किमस्ति। | पित्रा | अभ्यनुज्ञातः | जीमूतवाहन |
| 2) 'कामाः' पदस्य विशेषणपदं चिनुत। | पूरिताः | अभीष्टाः | पूर्वेषाम् |
| 3) 'इच्छाम्' पदस्य पर्यायपदं चिनुत। | कामम् | मनोरथं | अदरिद्राम् |
| 4) 'अहम्' पदं कस्मै प्रयुक्तम् ? | जीमूतकेतवे | जीमूतवाहनाय | कल्पतरवे |

प्रश्नाः -

1 अधोलिखितपदानां पर्यायपदं पाठात् चित्वा लिखत

1) पर्वतः
2) इन्द्रः
3) इच्छितम्
4) धरित्रीम्
5) वाणी
6) भूपतिः
7) धनम्
8) समीपम्
9) कल्याणम्
10) वृक्षम्

**II. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(i) एवम् आलोच्य सः पितुः अन्तिकम् आगच्छत्।

(ii) अस्मिन् संसारसागरे सर्वं धनं वीचिवत् चञ्चलम्।

(iii) अस्माभिः ईदृशः कल्पतरुः किमर्थं रक्ष्यते?

(iv) सः जीमूतवाहनः कल्पतरुम् उपगम्य उवाच।

(v) यथा पृथ्वीम् अदरिद्रां पश्यामि।

(vi) इति वाक् तस्मात् तरोः उदभूत्।

(vii) सः कल्पतरुः दिवं समुत्पत्य भुवि वसूनि अवर्षत्।

(viii) तस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम्।

(ix) त्वया अस्मत् पूर्वेषाम् अभीष्टाः कामाः पूरिताः।

(x) त्वया त्यक्तः एषोऽहं यातोऽस्मि।

**III. अधोलिखितवाक्यानि घटनाक्रमानुसारं संयोज्य पुनर्लिखत-**

I. (i) कञ्चनपुरस्य नगरस्य राजा जीमूतकेतुः आसीत्।

(ii) एकदा तस्य नृपस्य मन्त्रिणः कथितवन्तः।

(iii) हे युवराज! अयं कामदः कल्पतरुः सर्वैः पूज्यः वर्तते।

(iv) नृपस्य पुत्रः जीमूतवाहनः महान् दानवीरः सर्वभूतानुकम्पी अभवत्।

(v) एकदा सः पितरम् उपगम्य अवदत्–हे पितः! अहम् एतं कल्पतरुं परोपकाराय आराधयामि।

(vi) नृपः सचिवानां परामर्शेण पुत्रं यौवराज्येऽभिषिक्तवान्।

(vii) अस्मिन् अनुकूले स्थिते शक्रोऽपि अस्मान् बाधितुं न शक्यते।

(viii) तस्य गृहोद्याने कुलक्रमागतः एकः कल्पतरुः स्थितः आसीत्।

II. (i) पुत्रः जीमूतवाहनः कल्पतरुम् आराध्य अकथयत्।

(ii) क्षणेन सः कल्पतरुः दिवम् उत्पत्य भुवि वसूनि अवर्षत्।

(iii) हे देव! यथा पृथ्वीम् अदरिद्रां पश्यामि तथा भवान् करोतु इति।

(iv) त्वया अस्मत् पूर्वेषाम् अभीष्टाः कामाः पूरिताः तत् मम अपि एकां कामनां पूरय।

(v) तरुः जीमूत वाहनम् अवदत्–"त्वया त्यक्तः अहं गच्छामि इति"।

(vi) जीमूतवाहनस्य यशः सर्वत्र प्रथितम्।

(vii) तस्य जीमूतवाहनः अतीव महान् दानवीरः सर्वभूतानुकम्पी च पुत्रः आसीत्।

(viii) हिमालये कञ्चनपुरनगरस्य राजा जीमूतकेतुः विद्याधरपतिः आसीत्।

Yautube link ⇒ https://youtu.be/eW_X1z5mL3Y